# संस्कृतवार्ता:

**दिनाङ्क :** 19/**08/2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- एस.आई. आर. इति विषये संसद: सदने बाधितः, विरोधेन उभयसदने स्थगिते।
- विपक्षीयदलपक्षतः सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः बी. सुदर्शन् रेड्डीवर्यः उपराष्ट्रपतिपदाय नामाङ्कितः। प्रधानमन्त्री एन्. डी. ए. संसदीयदलस्य सभायां उपराष्ट्रपतिपदस्य अभ्यर्थी सी. पी. राधाकृष्णन् इत्यस्य परिचयं कारयित्वा सर्वसम्मतं प्रार्थितवान्।
- राष्ट्रिय-सुरक्षा-परामर्शकः अजित-डोभालः, चीनस्य विदेशमन्त्री वांग-यी च दिल्लीनगरे चतुर्विंशतितमं सीमा-वार्तालापं कृतवन्तौ।
- **अपि च,**
- क्रिकेट्-क्रीडायां एशिया-कप् इत्यस्मै भारतीयदलस्य घोषणा कृता; सूर्यकुमार-यादवः भारतीय-टी-20-इति दलस्य नेतृत्वं करिष्यति।

**संसत्स्थगनम्**

अद्य संसदः उभयसदनयोः कार्याचरणम् बिहार्-राज्ये मतदाता-सूच्यां विशेष-गहन-संशोधनेति विषये स्थगितम्। ततः पूर्वं लोकसभायाः कार्यम् त्रिवारं स्थगितम्, राज्यसभायाः कार्यञ्च एकवारं स्थगितम्, ततः परं दिनपर्यन्ताय च स्थगितम्। अपराह्णे चतुर्वादने तृतीयस्थगनानन्तरं यदा लोकसभायाः उपवेशनम् अभवत् तदा विपक्षस्य सांसदाः मध्य-सभामागत्य एस. आई. आर. इतिविषयमवलम्ब्य कोलाहलं कृतवन्तः। मध्यकोलाहले एव लोकसभायां भारतीय-प्रबन्धन-संस्थानानाम् अस्य वर्षस्य संशोधनात्मक- विधेयकम् स्वीकृतम्। विधेयकस्यास्य अंगीकरणानन्तरं, अध्यक्षः सभां दिनपर्यन्ताय स्थगितवान्।

**एन. डी. ए.-सभाः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य एन्. डी. ए. दलपक्षतः उपराष्ट्रपतिपदस्य अभ्यर्थिनः सी. पी. राधाकृष्णन् वर्यस्य सर्वसम्मत्या निर्वाचनाय सर्वाणि राजनैतिकदलानि, विपक्षिणश्च समाहूताः। अद्य प्रातः नवदेहल्यां एन्. डी. ए-संसदीय-पक्षस्य सभायां, श्रीमोदी श्री राधाकृष्णन्-वर्यं एन्. डी. ए-सांसदानां समक्षं परिचाययत्, तस्य दीर्घं सार्वजनिकजीवनं समुल्लेखयन् उक्तवान् यत् सः संसदः सदस्यत्वेन राज्यपालरूपेण च विभिन्न-क्षमताधायीनि कार्याणि अकरोदिति। सभायाः अनन्तरं प्रसारमाध्यमैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, उपराष्ट्रपतिनः निर्वाचने सर्वाणि राजनैतिकदलानि, तेषां सर्वेऽपि सांसदाश्च सर्वसम्मत्या राधाकृष्णन्-वर्यं समर्थयितुं प्रधानमन्त्री आवाहयदिति।

सः अवदत् यत् राधाकृष्णन् वर्यः कस्मादपि विवादात् दूरस्थो भूत्वा सरलं जीवनं यापयदिति, उपराष्ट्रपतिपदस्य निर्वाचनं सम्पूर्णदेशाय आनन्दस्य विषयो भविष्यतीति मन्त्री उक्तवान्। एतदतिरिच्य, काङ्ग्रेस्-पक्षस्य अध्यक्षः मल्लिकार्जुनखड़्गे वर्यः अद्य सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशं बी. सुदर्शनरेड्डी इत्यमुं आई एन डी आई ए-समूहात् उपराष्ट्रपतिनिर्वाचनस्य अभ्यर्थी इति अघोषयत्।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः** www.newsonair.gov.in **वेबसाइट इत्यत्र, अथ** newsonair **मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।**

**चीन-विदेशमंत्री-डोभाल चर्चा**

राष्ट्रिय-सुरक्षा-परामर्शदः अजित-डोभालः चीन-देशस्य विदेश-मन्त्री वांग-यी इत्येतौ अद्य नवदेहल्यां भारत-चीन-सीमा-विवादेति विषये चतुर्विंशतितमं विशेषप्रतिनिधिस्तरां चर्चां कृतवन्तौ। डोभालः गत-नवमासेषु सीमायां स्थितिः परिष्कृतेति अवोचत्। सः प्रधानमन्त्रिणः मोदिनः एस्. सी. ओ. शिखरसम्मेलने आगमनात् पूर्वम् इतोऽपि प्रगतिः भविष्यति इति आशां प्रकटितवान्।

**मन्त्रिमण्डलम् :**

राजस्थानस्य कोटा-बुन्दीति-नगरे ग्रीन्-फील्ड्-विमानस्थानकस्य विकासाय मन्त्रिपरिषत् अनुमोदनम् अददात्, यस्य अनुमानितव्ययः सार्धैकसहस्राधिक कोटिरूप्यकाणि अस्ति। परियोजनायां विंशति सहस्रवर्गमीटर्-परिमित क्षेत्रे विस्तृतस्य टर्मिनल्-भवनस्य निर्माणम् अन्तर्निहितमस्ति।

कोटा-नगरं राजस्थानस्य औद्योगिकराजधानीति मन्यते। कोटा-नगरं भारतस्य शैक्षणिक-प्रशिक्षण-केन्द्ररूपेणापि प्रसिद्धम् अस्ति। शैक्षणिक-औद्योगिक-क्षेत्रेषु अस्य प्रामुख्यमस्ति। अद्यापराह्णे नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, मन्त्रिमण्डलेन

ओडिशा-राज्याय अपि प्रायशः सपादाष्टलक्ष- कोटिरूप्यकाणां व्ययेन षण्मार्गीय-मुद्रिकापथनिर्माणमपि अनुमोदितम्। अयं भुवनेश्वर-उपमार्गः कटक-भुवनेश्वर-खोर्धा-नगरेषु बृहत्-वाणिज्यिक-यातायातं अपसार्य ओडिशा-राज्याय पूर्वराज्येभ्यश्च महत्त्वपूर्णं लाभं प्रदास्यति।

एतेन भारपरिवहनस्य कार्यक्षमता वर्धिता भविष्यति इत्यपि मंत्रिणा स्वकीय वक्तव्ये प्रोक्तम्।

**राष्ट्रपति-अधिकारिप्रशिक्षवः**

भारतीयविदेशसेवाधिकारित्वेन प्रशिक्षवः अद्य राष्ट्रपतिभवने राष्ट्रपतिपदासीनया द्रौपदीमुर्मु इत्यनया सह मिलितवन्तः। तान् सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् भारतस्य कूटनीतिः सप्तचत्वारिंशदधिकद्विसहस्र- तमवर्षपर्यन्तं विकसितराष्ट्रस्य लक्ष्य-दृष्ट्या सङ्ग्रहीता भवेदिति। सा अधिकारिभ्यः वैश्विकदृष्टिकोणेभ्यः मुक्ताः सन्तः शान्तिः, बहुलवादः, संवादः इत्यादीनां सभ्यताविषयकमूल्यानां समर्थनं कर्तुम् आग्रहम् अकरोत्। सा विदेशेषु भारतस्य परम्परायाः प्रचारे सांस्कृतिक-कूटनीतेः वर्धमानां भूमिकां अपि अवोचत्।

**राज्यसभा-खनिजागारः**

राज्यसभायां खनिजागाराणां विकासविनियमनयोः संशोधनात्मके विधेयक-पञ्चविंशत्यधिकद्विसहस्रम् इति विषये अद्य चर्चा आरब्धा। विधेयकमिदं विद्यमानागाराधिकारपत्रेषु खनिजानां संयोजनं सुलभञ्च कर्तुं, राष्ट्रिय-खनिजान्वेषण-न्यासस्य व्याप्तिम् विस्तारयितुं च प्रयतते। अङ्गार-खनिज-मन्त्री जी. किशन् रेड्डी इत्येषः अवदत् यत् अस्य विधेयकस्य उद्देश्यं महत्त्वपूर्ण-खनिजोपलब्धतां सुनिश्चितकरणेन सह अस्मिन् क्षेत्रे प्रगतिः पारदर्शिता च भवेदिति।

**जम्मू-कश्मीर : किश्तवाड़**

अद्य किश्तवाड-जनपदस्य चिसोटी-ग्रामे मेघस्फोटात् मृतानां सङ्ख्या चतुष्षष्टीं यावत् वर्धिताऽस्ति, सहाय्योद्धारदलानि एकस्याः महिलायाः मृतशरीरं अधः प्राप्तवन्तः। भग्नावशेषस्य अधः शरीरस्य एकः भागः अपि प्राप्तः, यः पूर्वं प्राप्तेन पीडितेण सह सम्बद्धः अस्तीति मन्यते। लुप्तानां जनानां सङ्ख्या अधुना एकोनचत्वारिंशदस्ति अद्यावधि सप्तषष्ट्युत्तराधिकैकशत-जनाः रक्षिताः सन्ति।

**पीएम-शुक्ला संवादः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना भविष्यत्कालीयाभियानस्य नेतृत्वं कर्तुं भारते अन्तरिक्षयात्रिकाणां विशालसमूहस्य निर्माणस्य आवश्यकता प्रकाशिता। मोदी वर्यः ह्यः नवदेहल्यां ग्रूप्-क्याप्टेन् शुभांशु शुक्लेन सह वार्तालापं कुर्वन् एतत् वक्तव्यं दत्तवान्। सः अवदत् यत् अधुना भारतस्य सम्मुखं भारतीय-अन्तरिक्ष-केन्द्रम्, गगनयानञ्चेति द्वे प्रमुखे अभियाने स्तः इति।

**एशिया कप-दलम्**

भारतस्य निकषदल-नायकः शुभमनगिलः एशिया-कप्-क्रीडायै उपनायकरूपेण नियुक्तोऽस्ति। सूर्यकुमार यादवः भारतीयस्य टी-20 इति दलस्य नेतृत्वं निरन्तरं करिष्यति। बि. सि. सि. आई. इत्यस्य प्रमुखः चयनकर्ता अजित अगरकरः पत्रकारसम्मेलने उक्तवान् यत् अष्टदलानां एशिया-कप् टी-20 प्रतियोगितायाः आयोजनं आबुधाबी-दुबई-नगरयोः सेप्टेम्बर् नवतः अष्टाविंशति दिनाङ्कपर्यन्तं भविष्यतीति।

**भुशुण्डिस्पर्धा**

वारद्वयस्य ओलम्पीकविजेत्री मनु भाकरः षोडश्यां एशियन् शूटिङ्ग् चाम्पियन्शिप इति क्रीडायां महिलानां दश मीटर परिमितायाः एयर पिस्टल-क्रीडायां दशमलव-सप्तोत्तराधिक-नवदशाधिकद्विशताङ्कैः कांस्यपदकं प्राप्नोत्। सा कोरियादेशस्य जिन् याङ्ग्, चीनदेशस्य कियान् के मा इत्येतयोः पश्चात् स्थानम् अवाप्नोत्।

**॥ इति वार्ता ॥**